# Atrikritam Shiva Stotram

# अत्रिकृतं शिवस्तोत्रम्

## Document Information

Text title : Atrikritam Shiva Stotram

File name : shivastotramatrikRRitaM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 68-82||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# अत्रिकृतं शिवस्तोत्रम्

अत्रिरुवाच -
नमो नमो निर्गुण निर्विकार
नमो नमो निष्कल निष्प्रपञ्च ।
नमो नमः शान्त नमो नमस्ते
नमो नमस्ते शिव सर्वरूप ॥ ६८॥

नमो नमः साम्ब नमो नमस्ते
नमो नमः शङ्कर सर्वहेतो ।
नमो नमोऽमेयगुणस्वरूप
तुरीयशम्भो सततं नमस्ते ॥ ६९॥

नमो नमोऽनन्तगुणैकसिन्धो
प्रपन्नबन्धो भगवन्नमस्ते ।
नमो नमः शर्व नमो नमस्ते
नमो नमः पर्ण्य नमो नमस्ते ॥ ७०॥

नमो नमस्तेऽस्तु नमोऽस्तु शम्भो
नमो नमस्तेऽस्तु नमोऽस्तु रुद्र ।
नमो नमस्ते गिरिजासहाय
नमो नमस्तेऽस्तु नमो महेश ॥ ७१॥

नमो नमस्तेऽस्तु हिरण्यबाहो
नमो नमस्तेऽतु हिरण्यरूप ।
नमो नमस्तेऽस्तु हिरण्यवर्ण
नमो नमस्तेऽस्तु हिरण्यहेतो ॥ ७२॥

नमो नमस्तेऽस्तु शशाङ्कमौले
नमो नमस्तेऽस्तु पिनाकपाणे ।
नमो नमस्तेऽस्तु वृषाङ्ककेतो

नमो नमस्तेऽस्तु नमो गिरीश ॥ ७३॥

नमो नमस्ते पृथिवीस्वरूप
नमो नमस्तेऽतु जलस्वरूप ।
तेजःस्वरूपाय नमो नमस्ते
वायुस्वरूपाय नमो नमस्ते ॥ ७४॥

आकाशरूपाय नमो नमस्ते
कालस्वरूपाय नमो नमस्ते ।
नमो नमस्तेऽस्तु दिगात्मने सदा
नमो नमस्ते सकलात्ममूर्तये ॥ ७५॥

नमो नमस्तेऽस्तु कर्पादने सदा
नमो नमस्तेऽस्तु कपालमालिने ।
नमो नमस्तेऽस्तु नमस्त्विषीमते
नमो नमस्तेऽस्तु निषङ्गणे नमः ॥ ७६ ॥

नमो नमस्तेऽस्तु नमोऽस्तु शाङ्गिणे
नमो नमस्तेऽस्तु नमोऽस्तु बभ्रुषे ।
नमो नमस्ते शिपिविष्ट शम्भो
नमो नमस्तेऽस्तु हरामरेश ॥ ७७॥

नमो नमस्ते हरिपूजिताङ्घ्रे
नमो नमस्ते हरिनेत्रपाद ।
नमो नमस्ते हरिजन्महेतो
नमो नमस्ते हरिगीतकीर्ते ॥ ७८॥

नमो नमस्ते विधिजन्महेतो
नमो नमस्ते विधिमूर्धहर्तः ।
नमो नमस्ते हरजन्महेतो
नमो नमस्ते हरहर्तृमूर्ते ॥ ७९॥

नमो नमस्तेऽखिलजन्महेतो
नमो नमस्तेऽखिलनाश हेतो ।
नमो नमो निर्मल नित्यरूप
नमो नमो नित्यविचारशुद्ध ॥ ८०॥

नमो नमो नित्यविशुद्ध बुद्ध
नमो नमो निर्भय भीमरूप ।
नमो नमः सर्गविसर्गहेतो
नमो नमः सर्गविनाशहेतो ॥ ८१॥

नमो नमस्ते हर मृत्युमृत्यो
नमो नमस्ते शिवविष्णुमृत्यो ।
नमो नमस्ते जगदेकमृत्यो
नमो नमः शङ्कर शङ्करेश ॥ ८२॥

॥ इति शिवरहस्यान्तर्गते अत्रिकृतं शिवस्तोत्रं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १४ । ६८-८२॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 68-82 ..

Encoded and proofread by Ruma Dewan

*Atrikritam Shiva Stotram*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*